# द्वादशः पाठः

## चन्द्रशेखरः आजादः



”तव किं नाम अस्ति?“

”आजादः।“

”कस्तव पिता?

”स्वाभिमानः।“

”क्व निवासस्थानम्?“

‘कारागारः’। न्यायाधीशस्य प्रश्नानाम् एतादृशानि उत्तराणि भारतस्य परतन्त्रताकाले यः अयच्छत् सः आसीत् चन्द्रशेखरः ‘आजादः’।

संस्कृतस्य एव छात्रः, नाम्ना चन्द्रशेखरः तदानीं वाराणस्यां पठति स्म। एकादशवर्षदेशीयः अयं यदा ‘जलियावाला’- काण्डस्य नृशंसताम् अशृणोत् तदा एव प्रतिज्ञाम् अकरोत् ‘येन केनापि प्रकारेण इदं क्रूरशासनम् उन्मूलनीयम्’ इति।

शीघ्रमेव सः कालः आगतः। भारते ब्रिटिशयुवराजः आगच्छत्। शासनेन तस्य सत्काराय आयोजनं कृतम्। तस्य बहिष्काराय भारतीयाः जनाः निश्चयम् अकुर्वन्। वाराणस्यां

क्वींसकालेज इति नाम्ना ख्यातस्य संस्कृतविद्यालयस्य प्राङ्गणे आजादः बहिष्कारान्दोलनं समचालयत्। तदा अल्पवयस्कमपि एतं राजपुरुषाः कारागारे अपातयन्। कतिपयदिनानन्तरं च तं न्यायालयम् आनयन्। न्यायाधीशः तं प पञ्चदशवर्षीयं बालकं तथाविधोत्तरदानेन उद्दण्डं ज्ञात्वा क्रूरतया दण्डितवान्- ”पञ्चदशवारं वेत्रदण्डेन ताडयित्वा कारागारात् निष्कासय इति।“

वेत्रप्रहारकः तं निर्वस्त्रं कृत्वा तस्य पृष्ठदेशं तथा निर्दयम् प्रहृतवान् यथा तस्य पृष्ठचर्म उच्छिन्नम् अभवत्। सः प्रतिवेत्रघातं ‘भारत-माता जयतु’ इति नादं तावद् अकरोत् यावत् किल सः मूर्च्छितः नाभवत्।

साइमन-समितेः बहिष्कारकाले वयोवृद्धं लालालाजपतरायं गौराङ्गाः तथा अताडयन् यथा स कतिपयैरेव दिनैः पञ्चत्वम् अगच्छत्। तस्य प्रतिशोधाय प्रवृत्ताः आजादः, भगतसिंहः, शिवरामः, राजगुरुः, जयगोपालश्च-इमे सर्वे लालालाजपतरायस्य मृत्योः मुख्यं कारणं गौराङ्गं सैन्डर्स-नामानम् अमारयन्।

आजादः 1931 तमे वर्षे फरवरी मासस्य सप्तविंशे दिनाङ्के पूर्वाह्ने दशवादनसमये प्रयागस्य अल्फ्रेड-वाटिकायां सुखदेवराजेन सह उपविष्टः आसीत्। तदा नाट-बावरेण सह अन्ये राजपुरुषाः तं सर्वतः आक्रामन्। नाट-बावरस्य भुशुण्डीगुलिका आजादस्य जङ्घायां प्रविष्टा। आजाद-प्रक्षिप्ता च गुलिका बावरस्य हस्तं भित्वा बहिर्गता। घटिकैकं यावद् उभयतः गुटिकावृष्टिः अभवत्। एकतः एकः आजादः अन्यतः च बहवः शत्रवः। यदा गुलिका समाप्तप्रायाः अभवन् तदा आजादः अन्तिमया गुटिकया आत्मानं हत्वा स्वकीयम् ‘आजाद’ इति नाम सार्थकम्् अकरोत्। एव´च सः स्वातन्त्र्ययज्ञकुण्डे स्वप्राणानाम् आहुतिं कृत्वा वीरगतिं प्राप्नोत्।

## शब्दार्थः

**अयच्छत्**=दिया **तदानीम्**=उस समय **एकादशवर्षदेशीयः**=लगभग ग्यारह वर्ष का **नृशंसताम्**=क्रूरता को (निर्दयता को) **उन्मूलनीयम्**=जड़ से उखाड़ देना चाहिए **समचालयत्**=स´चालित किया **अल्पवयस्कः**=कम उम्र के **कारागारे**=जेल में **वेत्रदण्डेन**=बेंत के डण्डे से **तथाविध**=उस प्रकार के **वेत्रप्रहारकः**=बेंत से प्रहार करने वाला

**प्रहृतवान्**=पीटा गया **उच्छिन्नम्**=उखड़ना **घटिका**=घण्टा **तावत्**=तबतक **पंचत्वम्**=मृत्यु को **गौराङ्गः**=अंग्रेज **सप्तविंशे दिनाङ्के**=सत्ताईसवीं तारीख में **भुशुण्डीगुलिका**=बन्दूक की गोली।

अभ्यासः

**1.उच्चारणं कुरुत पुस्तिकायां च लिखत-**

एकादशवर्षदेशीयः,कतिपयदिनान्तरम्, अल्पवयस्कमपि ,स्वातन्त्र्ययज्ञकुण्डे,बहिष्कारान्दोलनम्,गुटिकावृष्टिः।

**2.एकपदेन उत्तरत-**

यथा-आजादस्य पूर्णनाम किम् ? चन्द्रशेखरः आजादः

(क) कस्य स्वागतस्य बहिष्काराय जनाः निश्चयम् अकुर्वन् ?

(ख) वेत्रप्रहारकाले आजादः किम् उदघोषयत् ?

(ग) अल्फ्रेड-वाटिका कस्मिन् नगरे अस्ति ?

**3.पूर्णवाक्येन उत्तरत-**

(क) कदा वयोवृद्धं लालालाजपतरायं गौराङ्गाः अताडयन् ?

(ख) कस्य प्राङ्गणे आजादः बहिष्कारान्दोलनं समचालयत् ?

(ग) लालालाजपतरायस्य मृत्योः मुख्यं कारणं सैन्डर्स-नामानम् गौराङ्गं के अमारयन् ?

(घ) 'कस्तव पिता ?' इति प्रश्नस्य उत्तरं किम् अयच्छत् ?

**4.अधोलिखित-क्रियापदानां लकारं लिखत-**

| क्रियापदम् | लकारः |
|---|---|
| यथा-पठन्ति | लट् |
| आसीत् | ........... |
| गच्छेत् | ........... |
| अभवत् | ........... |

**5.उदाहरणानुसारं लकारपरिवर्तनं कुरुत-**

| लङ्लकारः | लट्लकारः |
|---|---|
| अयच्छत् | यच्छति |
| अश्रृणोत् | .................. |
| आगच्छत् | .................... |
| अमारयन् | ................... |

**6. संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) स्वतंत्रता दिवस पन्द्रह अगस्त को मनाया जाता है।

(ख) स्वतंत्रता संग्राम में अनेक राष्ट्रभक्तों ने प्राणों की आहुति दी।

(ग) चन्द्रशेखर आजाद संस्कृत विषय के छात्र थे।

(घ) हमारा देश पन्द्रह अगस्त सन् 1947 ई0 को स्वतंत्र हुआ।

(ङ) देश में संविधान 26 जनवरी सन् 1950 ई0 को लागू किया गया।

**7. मेलनं कुरुत-**

यथा-

- **गणतंत्र दिवसः** -दिसम्बर-मासस्य सप्त-दिनाङ्के
- **स्वतंत्रता दिवसः** -जनवरी-मासस्य षड्विंश-दिनाङ्के
- **महात्मागान्धी जन्मदिवसः-** अगस्त-मासस्य पञ्चदश-दिनाङ्क
- **झण्डा-दिवसः-**अक्टूबर-मासस्य द्वितीय-दिनाङ्के

**शिक्षण-सङ्केतः**

देशभक्तानां सत्प्रयासेनैव अस्माकं देशः स्वतन्त्रः जातः। कक्षायाम् अस्य विस्तृतं ज्ञानंददतु।

**स्मरणीयम्-**

अहं वीरबालः अहं वीरबालः

अहं मातृभक्तः अहं पितृभक्तः

अहं लोकसेवा-व्रती देशभक्तः।

अहं दीनबन्धुः अहं हीनबन्धुः

अहं पीडितानां महास्नेहसिन्धुः।।

अहं वीरबालः

यशः पुण्यैरवाप्यते।